श्रीगुरुभ्यो नमः

भागवते 'द्वा सुपर्णा' इति प्रसिद्धोपनिषन्मन्त्रस्य स्पष्टाद्वैतार्थनिर्णयप्रदर्शनम्

अस्मिन्नध्याये श्रीभगवानुद्धवमुद्दिश्य बन्धमोक्षयोरतात्त्विकत्वं तयोर्विद्याविद्यानिबन्धनत्वं च प्रतिज्ञाय तन्निरूपणार्थम् उपनिषद्गतपक्षिरूपकमनूद्य वर्णयति | शरीररूपवृक्षस्थपक्षिणौ द्वौ जीवात्मपरमात्मानौ संसारफलभोगतदभोगरूपिणौ प्रदर्श्य तत्र विद्यां लक्षयत्यनेन श्लोकेन -

आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः।
योऽविद्यया युक्स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ७। इति |

विद्वान् कीदृशीं विद्यां प्राप्नोति इत्यत्र तां विद्यामभिनयेन निर्दिशति - तयोर्मध्येऽन्यमित्युपलक्षितनिरन्नमीश्वरम् आत्मतया नाम अपिप्पलादोऽहं न तु पिप्पलादः इति जानाति | एवं स्वं वस्तुतोऽसंसारिणं विजानाति त्यक्त्वाऽविद्याकृतसंसारित्वभ्रमम् |

मुण्डकोपनिषद्भाष्ये द्वासुपर्णामन्त्रसन्दर्भे भगवद्भाष्यकारवचनं श्रीभगवदुक्तिसंवादीत्येतदत्र द्रष्टुं शक्यते -

// अन्यं वृक्षोपाधिलक्षणाद्विलक्षणम् ईशम् असंसारिणमशनायापिपासाशोकमोहजरामृत्य्वतीतमीशं सर्वस्य जगतोऽयमहमस्म्यात्मा सर्वस्य समः सर्वभूतस्थो नेतरोऽविद्याजनितोपाधिपरिच्छिन्नो मायात्मेति महिमानं विभूतिं च जगद्रूपमस्यैव मम परमेश्वरस्य इति यदैवं द्रष्टा, तदा वीतशोकः भवति सर्वस्माच्छोकसागराद्विप्रमुच्यते, कृतकृत्यो भवतीत्यर्थः ॥ //

उत्तरत्र तादृशविद्वान् शरीरे वसन्नपि व्यवहारे स्वं कथं योजयतीत्येतदपि कथ्यते -

देहस्थोऽपि स विद्वान् न वस्तुतो देहस्थः, स स्वप्नादुत्थितः पुरुषो यथा स्वाप्नं पुरुषं स्वात्मतया तदानीं विभावितमिदानीं तथा न विजानाति, स्वप्नदृष्टं पुरुषमतात्त्विकं मत्वा | अनेन जीवभावभावितावस्थायां कर्मफलभोक्तारं कर्तारं च स्वं विभावितं सम्प्रति विद्याबलेन तत्त्यक्त्वा पारमार्थिकम् अकर्त्रभोक्तृस्वरूपं स्वं मत्वा यावच्छरीरपातं तावच्छरीरे वसति -

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ 5.13 ॥ इति भगवद्गीतोक्तरीत्या |

विदुषो वैलक्षण्यमविद्वद्भावमुच्यते - अयं तु परमार्थतो अदेहस्थोऽप्यविद्यया स्वं संसारिणं मन्वानः कुमतिः देहस्थ एव | उक्तञ्चेदं भाष्यकारैः समन्वयाधिकरणभाष्ये -

एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःखतारतम्यमनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धम् । तथा च श्रुतिः ‘न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति’ इति यथावर्णितं संसाररूपमनुवदति । ‘अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः’ (छा. उ. ८ । १२ । १) इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते ।

न च कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वाभिमाननिमित्तं सुखं भवति । तदुक्तं श्रुत्या — ‘अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः’ (छा. उ. ८ । १२ । १) इति । शरीरे पतितेऽशरीरत्वं स्यात् , न जीवत इति चेत् , न ; सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात् । न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम् ।
नित्यमशरीरत्वमकर्मनिमित्तत्वादित्यवोचाम । इति |

अत्र पूर्वोक्तसर्वविषये एते भागवतश्लोकाः -

**श्रीमद्भागवतपुराणम्/स्कन्धः ११/अध्यायः ११**
https://sa.wikisource.org/s/apk

श्रीभगवानुवाच।
( अनुष्टुप् ) ।
बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः।
गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम् १।
शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया।
स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी २।
विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम्।
मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते ३।
एकस्यैव ममांशस्य जीवस्यैव महामते।
बन्धोऽस्याविद्ययानादिर्विद्यया च तथेतरः ४।
अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते।
विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि ५।
सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे।
एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान् ६।
आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः।
योऽविद्यया युक्स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ७।

देहस्थोऽपि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः।
अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृग्यथा ८।
इन्द्रियैरिन्द्रियार्थेषु गुणैरपि गुणेषु च।
गृह्यमाणेष्वहं कुर्यान्न विद्वान्यस्त्वविक्रियः ९।

एवमस्योपनिषन्मन्त्रस्याद्वैतार्थं भागवते स्पष्टमवगन्तुं शक्नुमः |

ओं तत् सत्

Srigurubhyo namah

A clear demonstration of the Advaitic meaning of the famous Upanishad mantra 'Dva Suparna' in the Bhagavatam

In this chapter of the Bhagavatam, the Supreme Lord, addressing Uddhava, emphatically says that bondage and liberation are not real and that they are caused by knowledge and ignorance, and to illustrate this, he relates the metaphor of two birds mentioned in the Upanishad. He describes the two birds, the individual Atman and the Paramatman, perched on the body-tree, marked by the enjoyment and non-enjoyment respectively of the fruits of the world, and notes what constitutes real knowledge in this verse:

आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः।
योऽविद्यया युक्स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ७।

The knower, Jnani, knows himself to be the 'other', the one that does not taste the fruit of karma, and not as the one who experiences the effect of karma. He who is endowed with avidya is ever bound and the one that is the knower of the Truth is ever liberated.

As to what kind of knowledge the learned man attains, the Lord refers to that by articulating: he knows that the non-eater Ishwara, who is identified as the 'other' between the two of them, is called Apippalada (non-eater) by himself and not Pippalada (eater of the karma fruit). Thus he knows himself to be not bound, in fact having abandoned the illusion of being bound, created by ignorance.

In the commentary on the Mundaka Upanishad, the Bhashyakara Shankaracharya's statement in the context of the Dva suparna Mantra is shown here as being in perfect tune with the words of the Lord:

// अन्यं वृक्षोपाधिलक्षणाद्विलक्षणम् ईशम् असंसारिणमशनायापिपासाशोकमोहजरामृत्य्वतीतमीशं सर्वस्य जगतोऽयमहमस्म्यात्मा सर्वस्य समः सर्वभूतस्थो नेतरोऽविद्याजनितोपाधिपरिच्छिन्नो मायात्मेति महिमानं विभूतिं च जगद्रूपमस्यैव मम परमेश्वरस्य इति यदैवं द्रष्टा, तदा वीतशोकः भवति सर्वस्माच्छोकसागराद्विप्रमुच्यते, कृतकृत्यो भवतीत्यर्थः ॥ //

(One knows oneself to be the 'other', the non-eater, Ishwara, unbound, beyond delusion, old age, death, the Self of the entire creation, one with all, residing in everyone, and not someone who is finite, endowed with ignorance, the pseudo self, ...such a one is liberated and becomes completely sated.)

In the sequel the Lord also says as to how such a Jnani applies himself to the worldly transactions even while he resides in the body:

Even though he is in the body, that Self-realized man is not in fact in the body, just as the man who has woken up from a dream does not identify himself with the man he saw in the dream though he then, in the dream, identified with that man. He knows now that the man seen in the dream is non-existent. In this state of right knowledge, he abandons the idea about himself as the enjoyer and doer by the power of knowledge, and considers himself as the transcendental non-doer-enjoyer and remains in the body until the fall of the body - as stated in the Bhagavadgita:

Having renounced all actions with the mind, one remains ever in happiness.
He does not do anything nor cause anything to be done, remaining in the nine-gated city. 5.13.

The difference between the Knower and the ignorant is brought out - but this fool, who is deluded into thinking himself to be bound, even though he is in the supreme sense not in the body, is in the body. This is also stated by the Bhashyakara Sri Shankaracharya in the Brahmasutra Bhashya on the sutra 'tat tu samanvayaat' (1.1.4):

एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःखतारतम्यमनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धम् । तथा च श्रुतिः ‘न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति’ इति यथावर्णितं संसाररूपमनुवदति । ‘अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः’ (छा. उ. ८ । १२ । १) इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते ।

Owing to ignorance one performs actions and as a result comes to be perpetually embodied. The Chandogya Upanishad says 'for the one embodied there is no freedom from pleasure and pain' which is the sign of bondage. On the other hand the one who is free from the

body identification, there is no affectation of the duality of pleasure and pain. This is the sign of liberation even while in the body.

न च कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वाभिमाननिमित्तं सुखं भवति । तदुक्तं श्रुत्या — 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छा. उ. ८ । १२ । १) इति । शरीरे पतितेऽशरीरत्वं स्यात् , न जीवत इति चेत् , न ; सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात् । न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम् । नित्यमशरीरत्वमकर्मनिमित्तत्वादित्यवोचाम । इति |

For a person identifying with the wearing of an ear stud, the joy arising out of such an ornament is seen. On the other hand if he is free from that identification, there is no joy owing to that ornament. The affectation or otherwise of pleasure and pain is because of the presence and absence of the identification with the body.

Question: Disembodiedness can be only after death and not while being alive.

Answer: Not so; such a knower is ever disembodied (even while remaining in the body,

Here are the Bhagavata verses that form the basis of the above discourse:

**श्रीमद्भागवतपुराणम्/स्कन्धः ११/अध्यायः ११**
https://sa.wikisource.org/s/apk

Canto 11, Chapter 11, verses 1 - 9

श्रीभगवानुवाच।
( अनुष्टुप् ) ।
बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः।
गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम् १।

शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया।
स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी २।
विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम्।
मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते ३।
एकस्यैव ममांशस्य जीवस्यैव महामते।
बन्धोऽस्याविद्ययानादिर्विद्यया च तथेतरः ४।
अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते।
विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि ५।
सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे।
एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान् ६।
आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः।
योऽविद्यया युक्स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ७।
देहस्थोऽपि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः।
अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृग्यथा ८।
इन्द्रियैरिन्द्रियार्थेषु गुणैरपि गुणेषु च।
गृह्यमाणेष्वहं कुर्यान्न विद्वान्यस्त्वविक्रियः ९।

एवमस्योपनिषन्मन्त्रस्याद्वैतार्थं भागवते स्पष्टमवगन्तुं शक्नुमः |

The English translation of the above verses can be accessed from any standard source like the Gitapress edition.

ओं तत् सत्

Thus we can clearly perceive the Advaitic purport of this Mundaka Upanishad Mantra in the Bhagavatam.

OM